श्रीशुक उवाच ।

"अपश्यतां चानिरुद्धं तद्बन्धूनाञ्च भारत ! ।
चत्वारो वार्षिका मासा व्यतीयुरनुशोचताम् ॥
नारदात्तदुपाकर्ण्य वार्त्तां बद्धस्य कर्म्म च ।
प्रययुः शोणितपुरं वृष्णयः कृष्णदेवताः ॥
प्रद्युम्नो युयुधानश्च गदः शाम्बोऽथ सारणः ।
नन्दोपनन्दभद्राद्या रामकृष्णानुवर्त्तिनः ॥
अक्षौहिणीभिर्द्वादशभिः समेताः सर्व्वतो दिशम् ।
रुरुधुर्बाणनगरं समन्तात् सात्वतर्षभाः ॥
भज्यमानपुरोद्यानप्राकाराट्टालगोपुरम् ।
प्रेक्षमाणो रुषाविष्टस्तुल्यसैन्योऽभिनिर्ययौ ॥
बाणार्थे भगवान् रुद्रः ससुतः प्रमथैर्वृतः ।
आरुह्य नन्दिवृषभं युयुधे रामकृष्णयोः ॥
आसीत् सुतुमुलं युद्धमद्भुतं लोमहर्षणम् ।
कृष्णशङ्करयो राजन् ! प्रद्युम्नगुहयोरपि ॥
कुम्भाण्डकूपकर्णाभ्यां बलेन सह संयुगम् ।
शाम्बस्य बाणपुत्त्रेण बाणेन सह सात्यकेः ॥
ब्रह्मादयः सुराधीशा मुनयः सिद्धचारणाः ।
गन्धर्व्वाप्सरसो यक्षा विमानैर्द्रष्टुमागमन् ॥
शङ्करानुचराञ्छौरिर्भूतप्रमथगुह्यकान् ।
डाकिनीर्यातुधानांश्च वेतालान् सविनायकान् ॥
भूतमातृपिशाचांश्च कुष्माण्डान् ब्रह्मराक्षसान् ।
द्रावयामास तीक्ष्णाग्रैः शरैः शार्ङ्गधनुश्च्युतैः ॥
पृथग्विधानि प्रायुङ्क्त पिणाक्यस्त्राणि शार्ङ्गिणे ।
प्रत्यस्त्रैः शमयामास शार्ङ्गपाणिरविस्मितः ॥
ब्रह्मास्त्रस्य च ब्रह्मास्त्रं वायव्यस्य च पार्व्वतम् ।
आग्नेयस्य च पार्ज्जन्यं नैजं पाशुपतस्य च ॥
मोहयित्वा तु गिरिशं जृम्भणास्त्रेण जृम्भितम् ।
बाणस्य पृतनां शौरिर्जघानासिगदेषुभिः ॥
स्कन्दः प्रद्युम्नबाणौघैरर्द्यमानः समन्ततः ।
असृग्विमुञ्चन् गात्रेभ्यः शिखिनापाक्रमद्रणात् ॥
कुम्भाण्डः कूपकर्णश्च पेततुर्मुषलार्द्दितौ ।
दुद्रुवुस्तदनीकानि हतनाथानि सर्व्वशः ॥
विशीर्य्यमाणं स्वबलं दृष्ट्वा बाणोऽत्यमर्षितः ।
कृष्णमभ्यद्रवत् संख्ये रथी हित्वैव सात्यकिम् ॥
धनूंष्याकृष्य युगपद्बाणः पञ्चशतानि वै ।
एकैकस्मिन् शरौ द्वौ द्वौ सन्दधे रणदुर्म्मदः ॥
तानि चिच्छेद भगवान् धनूंषि युगपद्धरिः ।
सारथिं रथमश्वांश्च हत्वा शङ्खमपूरयत् ॥
तन्माता कोटवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्त्रप्राणरिरक्षया ॥
ततस्तिर्य्यङ्मुखो नग्नामनिरीक्षन् गदाग्रजः ।
बाणश्च तावद्विरथश्छिन्नधन्वाविशत् पुरम् ॥
विद्राविते भूतगणे ज्वरस्तु त्रिशिरास्त्रिपात् ।
अभ्यधावत दाशार्हं दहन्निव दिशो दश ॥
अथ नारायणो देवस्तं दृष्ट्वा व्यसृजत् ज्वरम् ।
माहेश्वरो वैष्णवश्च युयुधाते ज्वरावुभौ ॥
माहेश्वरः समाक्रन्दन् वैष्णवेन बलार्द्दितः ।
अलब्ध्वा भयमन्यत्र भीतो माहेश्वरो ज्वरः ॥
शरणार्थी हृषीकेशं तुष्टाव प्रयताञ्जलिः ॥

ज्वर उवाच ।

नमामि त्वानन्तशक्तिं परेशं
सर्व्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥
कालो दैवं कर्म्म जीवः स्वभावो
द्रव्यं क्षेत्रं प्राण आत्मा विकारः ।
तत्संघातो बीजरोहप्रवाह-
स्त्वन्मायैषा तन्निषेधं प्रपद्ये ॥
नानाभावैर्लीलयैवोपपन्नै-
र्देवान् साधून् लोकसेतून् बिभर्षि ।
हंस्युन्मार्गान् हिंसया वर्त्तमानान्
जन्मैतत्ते भारहाराय भूमेः ॥
तप्तोऽहन्ते तेजसा दुःसहेन
शान्तोग्रेणात्युल्बणेन ज्वरेण ।
तावत्तापो देहिनां तेऽङ्घ्रिमूलं
नो सेवेरन् यावदाशानुबद्धाः ॥

श्रीभगवानुवाच ।

त्रिशिरस्ते प्रसन्नोऽहं व्येतु ते मज्ज्वराद्भयम् ।
यो नौ स्मरति संवादं तस्य त्वन्नो भवेद्भयम् ॥
इत्युक्तोऽच्युतमानम्य गतो माहेश्वरो ज्वरः ।
बाणस्तु रथमारूढः प्रागाद्योत्स्यन् जनार्द्दनम् ॥
ततो बाहुसहस्रेण नानायुधधरो नृपः ।
मुमोच परमक्रुद्धो बाणांश्चक्रायुधे नृप ! ॥
तस्यास्यतोऽस्त्राण्यसकृच्चक्रेण क्षुरनेमिना ।
चिच्छेद भगवान् बाहून् शाखा इव वनस्पतेः ॥
बाहुषु छिद्यमानेषु बाणस्य भगवान् भवः ।
भक्तानुकम्प्युपव्रज्य चक्रायुधमभाषत ॥

श्रीरुद्र उवाच ।

त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ॥
नाभिर्नभोऽग्निर्मुखमम्बु रेतो
द्यौः शीर्षमाशाः श्रुतिरङ्घ्रिरुर्व्वी ।
चन्द्रो मनो यस्य दृगर्क आत्मा
अहं समुद्रो जठरं भुजेन्द्रः ॥
रोमाणि यस्यौषधयोऽम्बुवाहाः
केशा विरिञ्चो धिषणा विसर्गः ।
प्रजापतिर्हृदयं यस्य धर्म्मः
स वै भवान् पुरुषो लोककल्पः ॥
तवावतारोऽयमकुण्ठधामन्
धर्म्मस्य गुप्त्यै जगतो भवाय ।
वयञ्च सर्व्वे भवतानुभाविता
विभावयामो भुवनानि सप्त ॥
त्वमेक आद्यः पुरुषोऽद्वितीय-
स्तुर्य्यः स्वदृग्घेतुरहेतुरीशः ।
प्रतीयसेऽथापि यथा विकारं
स्वमायया सर्व्वगुणप्रसिद्ध्यै ॥
यथैव सूर्य्यः पिहितः स्वच्छायया
छायाञ्च रूपाणि च सञ्चकास्ति ।
एवं गुणेनापिहितो गुणांस्त्व-
मात्मप्रदीपो गुणिनश्च भूमन् ॥